दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णत्रयोदशी-चतुर्दशी
चैत्र 03 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-145 | 1 | मार्च 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 वैश्विक-ऊर्जा-संकटस्य निवारणाय अन्तर्राष्ट्रिय-ऊर्जा-अभिकरणस्य (IEA) महत्त्वपूर्णः निर्णयः

3 हिमाचलप्रदेशस्य कृषकाणाम् आर्थिक- सुदृढ़ीकरणाय सर्वकारस्य प्रयासः- सुखविंद्र सिंह सुक्खुः

4 कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः (१४) दीक्षान्त-समारोहः मार्च १८ दिनांके

## हिन्दी-लेखिका ममता कालिया तथा च संस्कृतभाषायाः साधु भद्रेशदासः साहित्य-अकादमी पुरस्कारेण सम्मानितौ भविष्यतः




**हिमसंस्कृतवार्ताः** - साहित्य-अकादमी चतुर्विंशति-भारतीयभाषासु स्वकीयान् वार्षिक-साहित्य-अकादमी-पुरस्कारान् अघोषयत्। हिन्दी-लेखिका ममता कालिया स्वस्य 'जीते जी इलाहाबाद' इत्यस्य कृते, प्रसिद्धः नवतेज सरना महोदयः स्वस्य 'क्रिम्सन स्प्रिंग' (Crimson Spring) इति आङ्ग्ल-उपन्यासाय, संस्कृत भाषायाः साधु भद्रेशदासः च साहित्य अकादमी पुरस्कारेण सम्मानिताः भविष्यन्ति। संस्कृति-मन्त्रालयानुसारं अस्मिन् वर्षे अष्टौ काव्य-पुस्तकानि, चत्वारः उपन्यासाः, षट् कथा-सङ्ग्रहाः, द्वौ निबन्धौ च एतं सम्मानं प्राप्तवन्तः। एतदतिरिक्तं एकं साहित्यिक-समालोचनं, एकं आत्मचरितं तथा द्वौ संस्मरणौ अपि पुरस्कारार्थं चितौ। प्रत्येकं विजेत्रे एक-लक्षं रूप्यकाणि, एकः उत्कीर्ण-ताम्रफलकः पुरस्काररूपेण मार्च-मासस्य एकत्रिंशत् दिनाङ्के एकस्मिन् विशेष-समारोहे प्रदास्यन्ते।

## ओडिशा-चिकित्सालये अग्निकाण्डः न्यूनातिन्यूनं दश रुग्णाः मृत्युमुपगताः

**हिमसंस्कृतवार्ताः** - ओडिशा-राज्यस्य कटक-नगरे स्थिते एस.सी.बी-आयुर्विज्ञान-महाविद्यालयस्य आघात-निवारण-गहन-चिकित्सा-विभागे अग्निकाण्डेन न्यूनातिन्यूनं दश रुग्णाः मृत्युमुपगताः। एषा दुर्घटना विद्युत्-लघुपथेन जाता इति आशंक्यते, येन चिकित्सालये भीतिः अभवत्। मुख्यमन्त्री मोहनचरण माझी महोदयः उक्तवान् यत् सप्त रुग्णाः चिकित्सा कक्षे एव मृताः, अन्ये त्रयः तु अन्यत्र स्थानान्तरण-समये प्राणान् अत्यजन्। राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् तथा प्रधानमन्त्री नरेन्द्रमोदी च एतस्यां घटनायां शोकं प्रकटितवन्तः। प्रधानमन्त्रिणा 'प्रधानमन्त्री राष्ट्रीय-सहायता कोषात्' मृतानां परिवारेभ्यः द्विलक्षरूप्यकाणि सममेव व्रणितेभ्यः पंचाशत्सहस्रं रूप्यकाणि दातुं घोषणा कृता।

## गुजरात-राज्यस्य मुन्द्रा-पोताश्रये एल.पी.जी-वाहकपोतः 'शिवालिकः' प्राप्तवान्, अन्यः भारतीय-पोतः 'नन्दा देवी' अद्य आगमिष्यति




**हिमसंस्कृतवार्ताः** - गुजरात-राज्यस्य मुन्द्रा-पोताश्रये एल.पी.जी-वाहकपोतः 'शिवालिकः' प्राप्तवान्। नवदेहल्यां पश्चिम-एशिया-विषये आयोजिते अन्तर-मन्त्रालयीय-संवादे पत्तन-पोत-परिवहन-मन्त्रालयस्य विशेष-सचिवः राजेशकुमार सिंहः सूचितवान् यत् पोताश्रये प्राथमिकताधारेण स्थानं निश्चितं कृतं येन सामग्री-निक्षेपणे विलम्बः न भवेत्। तेन उक्तं यत् अन्यः भारतीय-पोतः 'नन्दा देवी' अद्य आगमिष्यति। पेट्रोलियम-मन्त्रालयस्य संयुक्त सचिवः सुजाता शर्मा सूचितवती यत् देशे खनिजतैलं पर्याप्तमात्रायां उपलब्धम् अस्ति तथा च पेट्रोल-पम्प-केन्द्रेषु तैलस्य न्यूनता नास्ति। विदेश-मन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सूचितवान् यत् ईराने स्थिताः प्रायः पंचाशदुत्तरपंचशत् भारतीयाः आर्मेनिया-देशं तथा दश भारतीयाः अज़रबैजान-देशं स्थलसीमायाः माध्यमेन प्रविष्टवन्तः। तेन सूचितं यत् सङ्कटकाले अपि ईराने स्थितः भारतीय-दूतावासः पूर्णतया सक्रियः अस्ति।

## निर्वाचन-आयोगेन पश्चिमबङ्गाल-राज्यस्य चतुर्णां वरिष्ठ-आरक्षकाधिकारिणाम् तत्कालं स्थानान्तरणं कृतम्




**हिमसंस्कृतवार्ताः** - निर्वाचनायोगेन पश्चिमबङ्गाल-राज्यस्य चतुर्णां वरिष्ठ-आरक्षकाधिकारिणाम् तत्कालं स्थानान्तरणं कृतम्। निर्वाचनायोगेन राज्यस्य आरक्षक-महानिदेशकस्य, कारागार-सेवा-महानिदेशकस्य, अतिरिक्त महानिदेशकस्य अपि च कोलकातायाः आरक्षक-आयुक्तस्य स्थानान्तरणस्य आदेशो प्रख्यापितः। अवधेयं यत् द्विनवत्युत्तर-नवदश-शततम-वर्षस्य आई.पी.एस. अधिकारी सिद्धनाथ गुप्तः इदानीं पश्चिमबङ्गालस्य नूतनः आरक्षक-महानिदेशको भविष्यति। सममेव षण्णवत्युत्तर-नवदशत-तम-वर्षस्य आई.पी.एस. अधिकारी अजयकुमार नन्दः कोलकाता-नगरस्य आरक्षक-आयुक्तत्वेन नियुक्तः। एकनवत्युत्तर-नवदश-तमवर्षस्य आई.पी.एस. अधिकारी एन. रमेश बाबू कारागार-सेवा-महानिदेशकत्वेन कार्यं विधास्यति। चतुर्नवत्युत्तर-नवदशतम-वर्षस्य आई.पी.एस. अधिकारी अजय मुकुन्द रानाडे अतिरिक्त-महानिदेशकत्वेन नियुक्तः।

## वर्तमानसङ्कटः भारतस्य कारणात् नास्ति, तस्य निर्माणे भारतस्य किमपि योगदानं नास्ति - जे. पी. नड्डा



**हिमसंस्कृतवार्ताः** - राज्यसभायाः सभाध्यक्षः जे. पी. नड्डा देशे सूचितस्य एल्. पि. जि. सङ्कटकालस्य विषये काङ्ग्रेस्-दलं राजनीतिं कुर्वन् अस्ति इति आरोपयन्, वर्तमानसङ्कटः भारतस्य कारणात् नास्ति, तस्य निर्माणे भारतस्य किमपि योगदानं नास्ति इति उक्तवान्। सः सभायै सूचितवान् यत् विद्यमानायाः अन्ताराष्ट्रिय-परिस्थित्याः कारणात् सङ्कटं उद्भूतम् अस्ति। अस्य सङ्कटकालस्य प्रतिक्रियारूपेण, सर्वकारः विस्तृतं चर्चा कृत्वा परिस्थितिं स्पष्टतया व्याख्यायितवान्, परन्तु ते श्रोतुं न इच्छन्ति। इतः प्राक् शून्यहोराकाले विपक्षस्य नेता मल्लिकार्जुन खड़गेवर्यः सदने एल. पी. जी. इत्यस्य विषयं उपस्थापितवान् तथा च सङ्कटकालस्य निवारणार्थं आवश्यकानि उपायानि न स्वीकर्तुं अपि आरोपितवान्।

## सुभाषितम्

**ईर्ष्ययैव समुद्विग्नाः, पुरुषाद्दुष्टचेतसः।**
**अतिसक्ताः पलायन्ते, श्रीधृतिस्मृतिकीर्तयः।।**

भावार्थः- दुष्ट मानसिकता वाले तथा दूसरों की उन्नति और समृद्धि पर अत्यधिक ईर्ष्या करने वाले व्यक्तियों की समृद्धि, आत्मबल, धैर्य, स्मृति, समाज में यश और प्रसिद्धि शीघ्र ही नष्ट हो जाते हैं।




## मतुआ धर्ममेलायाः अवसरे केन्द्रीयगृहमन्त्रिणः शुभाशयाः

केन्द्रीयगृहमन्त्री अमितशाहः मतुआ-धर्ममेलायाः शुभोपलक्ष्ये मतुआ-समुदायं वर्धापितवान्। एषः मेला समाजं प्रति भक्ति-समर्पण-समानता-नैतिकमूल्यानां च शिक्षाप्रदातुः श्रीहरिचन्दठाकुरस्य २१५ तमे जयन्त्युत्सवे आयोजितो भवति। श्रीशाहः सामाजिक-माध्यमेन (सोशल मीडिया) न्यवेदयत् यत् श्रीहरिचन्दठाकुरस्य उपदेशाः अद्यापि अस्माकं कृते नैतिक-पथप्रदर्शकाः सिद्धान्ताः सन्ति। सः आशां प्रकटितवान् यत् पश्चिमबङ्गस्य उत्तर-२४ परगना मण्डले आयोज्यमानः अयं मतुआ-धर्ममेला एतान् सिद्धान्तान् प्रति समाजस्य प्रतिबद्धतां सुदृढां करिष्यति।

# सांसदस्य सुरेशकश्यपस्य लोकसभायां पर्वतीयराज्यानां पर्यावरणनीति-विषये प्रश्नः



**हिमसंस्कृतवार्ताः- शिमला।** भाजपा-लोकसभासदस्यः सुरेशकश्यपः प्रश्नकाले पर्वतीयराज्यानां कृते विशिष्टायाः पृथक् पर्यावरणनीतेः आवश्यकतां प्रति सदनस्य ध्यानम् आकर्षितवान्।

## सांसदस्य प्रमुखाः प्रश्नाः-

तेन पर्यावरण-वन-वायुपरिवर्तनमन्त्रिणं प्रति पृष्टं यत्-

• हिमाचलप्रदेशसहितेषु अन्येषु पर्वतीयराज्येषु तीव्रगत्या वर्धमानं पर्यटनं, औद्योगिकगतिविधयः, आधारभूतसंरचनायाः विस्तारः च पर्यावरणं कथं प्रभावयन्ति?

• अपशिष्टप्रबन्धनस्य (Waste Management) आव्हानानि तथा वर्धमानं वायु-जल-ध्वनिप्रदूषणं नियन्त्रयितुं केन्द्रसर्वकारेण के विशेषप्रयासाः क्रियन्ते?

• किं सर्वकारः पर्वतीयराज्यानां भौगोलिकतां दृष्ट्वा काञ्चन व्यावहारिकीं पर्यावरणनीतिं निर्मातुं विचारं करोति?

## • केन्द्रीयमन्त्रिणः प्रत्युत्तरम्

केन्द्रीय पर्यावरण- वन-जलवायुपरिवर्तन राज्यमन्त्री कीर्तिवर्धनसिंह महोदयः सविस्तरम् उत्तरं दत्तवान्-

• **हिमालयस्य महत्त्वम्-** सः अवदत् यत् भारतीयहिमालयक्षेत्रं देशस्य कृते अत्यन्तं महत्त्वपूर्णम् अस्ति। एतत् क्षेत्रं न केवलं निवासिनां कृते जीवनधारः अस्ति, अपि तु मैदानीक्षेत्राणां कृते जलं, जैवविविधतां, पारिस्थितिकिसन्तुलनं च प्रददाति।

**• जी. बी. पन्त संस्थानस्य भूमिका-**

मन्त्रालयान्तर्गतं 'जी. बी. पन्त राष्ट्रिय- हिमालीय- पर्यावरण- संस्थानं' (GBPNIHE) निरन्तरं शोधं करोति। एतत् संस्थानं वायु-जल-गुणवत्तायाः, मानवीयप्रभावाणाञ्च अध्ययनं कृत्वा नीतिनिर्धारणे साहाय्यं करोति।

• **नियामक-उपायाः-** मन्त्रिणा स्पष्टीकृतं यत् पर्वतीयक्षेत्रेषु पर्यावरण-प्रभाव-आकलनं (EIA), वनसंरक्षणनियमाः, वन्यजीवसंरक्षणअधिनियमः च कठोरतया पाल्यन्ते। वैज्ञानिकाध्ययनस्य आधारेण एव विकासपरियोजनानां अनुमतिः दीयते।

**• राष्ट्रिय- स्वच्छवायु- कार्यक्रमः-**

अस्य अन्तर्गतं देशस्य १३० नगरेषु (येषु हिमालयी नगराणि अपि सन्ति) वायुगुणवत्तां सुधारयितुं कार्ययोजनाः निर्मिताः सन्ति।

**सतत-पर्यटनं विकासश्च-**

केन्द्रीयमन्त्रिणा उक्तं यत् सर्वकारः 'सतत- उत्तरदायी- पर्यटनं' (Sustainable & Responsible Tourism) प्रवर्धयति। अस्य अन्तर्गतं अधोलिखितबिन्दुपु ध्यानं दीयतेः

• पर्वतढालूनां संरक्षणम्।
• जलस्रोतसां सुरक्षा।
• मृदा-अपरदनस्य रोधः।
• पारिस्थितिक-संवेदनशीलक्षेत्राणां रक्षणम्।

सांसदः सुरेशकश्यपः अवदत् यत् हिमाचलसदृशराज्येषु विकास-पर्यावरणयोः मध्ये सन्तुलनं अनिवार्यम् अस्ति। पर्वतीयक्षेत्राणां परिस्थितयः मैदानीक्षेत्रेभ्यः भिन्नाः सन्ति, अतः विशेषदृष्टिकोणस्य आवश्यकता वर्तते। तेन आशा व्यक्तं कृता यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे हिमालयक्षेत्रस्य कृते भविष्ये अधिकाः प्रभाविन्यः नीतयः आगमिष्यन्ति, येन संरक्षणेन सह रोजगारस्य अवसराः अपि वर्धिष्यन्ते।

# संविदाकार-वर्गाणां प्रलम्बित-धनादेशाय सर्वकारेण ५०० कोटिरुप्यकाणि निर्गतानि- नरेशचौहानः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः प्रधानपरामर्शदाता (प्रचारमाध्यमम्) नरेशचौहानः अवदत् यत् राज्यसर्वकारेण संविदाकाराणां (कन्ट्रैक्टर-वर्गाणाम्) प्रलम्बित- प्रतिदानाय ५०० कोटिरुप्यकाणि निर्गतानि, येन १ मार्च दिनाङ्कपर्यन्तम् अवशिष्टस्य राशेः प्रदानं कर्तुं शक्येत। सः अकथयत् यत् पूर्वमपि राज्यसर्वकारेण अस्मिन् उद्देश्याय २५० कोटिरुप्यकाणि दत्तानि आसन्। नरेशचौहानः अद्य अत्र प्रसारमाध्यमैः सह वार्तालापं कुर्वन् अवदत् यत् राज्यसर्वकारः वित्तीय-अनुशासनेन सह कार्यं कुर्वन् अस्ति तथा प्रदेशस्य विकासकार्येषु किमपि बाधा न आगमिष्यति। सः उक्तवान् यत् विपक्षः राज्यस्य वित्तीयस्थितिं संलक्ष्य निरन्तरं टिप्पणीं करोति, परन्तु तेभ्यः आलोचनायाः स्थाने सर्वकारेण सह सहयोगात्मकः व्यवहारः करणीयः। सः अकथयत् यत् एतद् दुर्भाग्यपूर्णं वर्तते यत् विपक्षस्य नेतारः राज्यस्य हितसम्बद्ध-विषयेषु गम्भीराः न सन्ति। राज्यस्य जनता प्रक्ष्यति यत् यदा हिमाचलप्रदेशस्य हितानां चर्चा प्रचलति स्म, तदा विपक्षः किं करोति स्म? नरेशचौहानः अवदत् यत् आपदाकाले प्रधानमन्त्रिणा नरेन्द्रमोदी-महोदयेन हिमाचलप्रदेशाय १५०० कोटिरुप्यकाणां घोषणा कृता आसीत्, परन्तु इयं राशिः अद्यापि राज्येन न प्राप्ता। सः उक्तवान् यत् कांग्रेस-सांसदः रजनीपाटिलः संसदि इमं विषयं उत्थापितवती, किन्तु हिमाचलस्य भाजपा-सांसदाः आरडीजी (RDG) स्थगनस्य तथा वित्तीयसहायतायाः विषयं न उत्थापितवन्तः। सः अकथयत् यत् हिमाचलप्रदेशेन सह भेदप्रथा किमर्थं क्रियते, अयं एकः गम्भीरः प्रश्नः अस्ति। आरडीजी-स्थगने सत्यपि राज्यसर्वकारः वित्तीयस्थितिं सुदृढं कर्तुं विकासकार्याणि च निरन्तरं चालयितुं प्रमुखान् निर्णयान् स्वीकुर्वन् अस्ति।

# वैश्विक-ऊर्जा-संकटस्य निवारणाय अन्तर्राष्ट्रिय-ऊर्जा-अभिकरणस्य (IEA) महत्त्वपूर्णः निर्णयः

अन्तर्राष्ट्रिय-ऊर्जा-अभिकरणेन (IEA) घोषितं यत् तस्य सदस्यदेशाः वैश्विक-ऊर्जा-संकटस्य निवारणाय स्वकीयात् आपत्कालीन-भण्डारात् विशालमात्रायां तैलं निष्कासयिष्यन्ति। अभिकरणेन एकस्मिन् वक्तव्ये सूचितं यत् एशिया-ओशेनिया क्षेत्रस्य देशाः तत्कालं तैलप्रदानं आरप्स्यन्ते, यदा तु यूरोप-अमेरिका देशयोः आपत्कालीन-भण्डारात् आपूर्तिः अस्य मासस्य अन्ते आरब्धा भविष्यति। अनेन आपत्कालीन-उपायेन विश्वे तैलस्य आपूर्तिः वर्धिष्यते।अन्तर्राष्ट्रिय-ऊर्जा-अभिकरणेन चत्वारिंशत् कोटि (400 million) बैरल परिमितं तैलम् निर्देशितुं उद्घोषितम्। इयं मात्रा वर्ष २०२२ मध्ये रूस-युक्रेन-युद्धानन्तरं मुक्तस्य तैलस्य द्विगुणादपि अधिका अस्ति।अभिकरणस्य नवीन-वृत्तान्त (Report) अनुसारं सदस्यदेशैः ४१ कोटिः विंशतिलक्षं (412 million) बैरल परिमितं तैलं प्रदातुं प्रतिबद्धता प्रकटिता। अस्मिन् प्रायः ७२ प्रतिशतं अपरिष्कृतं तैलं (Crude Oil) भविष्यति, शेषं च परिष्कृतम् उत्पादं भविष्यति। अमेरिकादेशस्य ऊर्जामन्त्री क्रिस राइट महोदयः अवदत् यत् इरानेन सह संघर्षः आगामिषु कतिपयेषु सप्ताहषु समाप्तः भविष्यति इति आशा अस्ति। तदनन्तरं वैश्विकस्तरे तैलस्य आपूर्तिः वर्धिष्यते तथा च मूल्येषु न्यूनीकरणं भविष्यति।

# लोकसभायां षविंशत्युत्तर द्विसहस्रतम वर्षस्य सप्तविंशत्युत्तर द्विसहस्रतम वर्षस्य च कृते रेल-मन्त्रालयस्य अधीनं अनुदानविषयेषु चर्चा समारब्धा



**हिमसंस्कृतवार्ताः** - लोकसभायां षड्विंशत्युत्तर द्विसहस्रतम वर्षस्य सप्तविंशत्युत्तर द्विसहस्रतम वर्षस्य च कृते रेल-मन्त्रालयस्य अधीनं अनुदानविषयेषु चर्चा समारब्धा। चर्चा प्रारम्भमाणः काङ्ग्रेस-दलस्य तारिक अनवरः आरोपयद् यत् सर्वकारः स्वलक्ष्याणां प्राप्तौ विफलः अभवत्। सः उक्तवान् यत् **'अमृत भारत स्टेशन'** योजनायाः अन्तर्गतं सप्तत्रिंशदुत्तर त्रयोदशशत स्थानकेषु केवलं षष्ठ्युत्तरैकशत स्थानकेषु एव पुनर्विकासकार्यं पूर्णं जातम्। अनवर महोदयः एतदपि आरोपयत् यत् सर्वकारः यात्रीसुरक्षायाः नाम्नि केवलं घोषणाः करोति, तथा च सः भारतीय रेलमार्गेषु वृत्तेः न्यूनतां प्रति चिन्तां प्रकटितवान्। अपरपक्षे भाजपेति दलस्य गणेशसिंहः उक्तवान् यत् गतदशवर्षेषु रेलक्षेत्रे महत्त्वपूर्णं परिवर्तनं जातम्। सः अवदत् यत् त्रिदशाधिकद्विसहस्रतमे वर्षे रेल-आयव्ययकं केवलं त्रिषष्टि-सहस्र-कोटि-रूप्यकाणि आसीत्, यत् अधुना वर्धित्वा द्विदशांश सप्त अष्ट लक्ष-कोटि-रूप्यकाणि अभवत्।

# हिमाचलप्रदेशस्य कृषकाणाम् आर्थिक- सुदृढ़ीकरणाय सर्वकारस्य प्रयासः- सुखविंद्र सिंह सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारस्य, राष्ट्रिय डेयरी विकास बोर्ड (NDDB) इत्यस्य च मध्ये मुख्यमन्त्रिणः सुखविंद्र सिंह सुक्खुमहोदयस्य उपस्थितौ त्रयः सामञ्जस्यपत्राः (MoUs) हस्ताक्षारिताः।

### त्रीणि प्रमुखानि सहमतिपत्राणि-

१. कांगड़ा दुग्धसङ्घस्य गठनम्- कांगड़ा-मण्डले दुग्धसङ्घस्य निर्माणं तस्य सञ्चालनं च।
२. नूतनसंयन्त्राणां स्थापना- सिरमौरमण्डलस्य नाहन नगरे, सोलनमण्डलस्य नालागढ़े च प्रतिदनं २० सहस्रं लीटर क्षमतायुक्तानां द्वयोः दुग्धप्रसंस्करणयन्त्रयोः स्थापना। हमीरपुरस्य जलाड़ी, ऊनामण्डलस्य झलेड़ाक्षेत्रे दुग्ध-अभिशीतनकेन्द्राणां निर्माणम्।
३. ईआरपी (ERP) सॉफ्टवेयरः दुग्धसङ्घेषु पारदर्शितायै 'उद्यम संसाधन नियोजन' सॉफ्टवेयर इत्यस्य प्रयोगः।

### प्रमुखविशेषताः उपलब्धयश्च

- ढगवार दुग्धप्रयोजना- कांगड़ामण्डलस्य ढगवारक्षेत्रे २५० कोटिरूप्यकाणां व्ययेन आधुनिकं दुग्धप्रसंस्करणयन्त्रं स्थाप्यते। अस्य क्षमता प्रतिदिनं १.५० लक्षं लीटर परिमिता भविष्यति।
- अङ्कीय-प्रबन्धनम्- सॉफ्टवेयर-माध्यमेन दुग्धस्य गुणवत्तापरीक्षणं, भण्डारणं, वितरणं च पारदर्शिरूपेण भविष्यति, येन कृषकाणां भुगतानं शीघ्रं सुनिश्चितं भविष्यति।
- समर्थनमूल्येषु वृद्धिः- हिमाचलप्रदेशः देशस्य प्रथमं राज्यं जातः यत्र दुग्धक्रयणे सर्वाधिकं मूल्यं दीयते।
- गोधनदुग्धम्- ३२ रूप्यकेभ्यः वर्धित्वा ५१ रूप्यकाणि प्रतिलीटर।
- महिषीदुग्धम्- ४७ रूप्यकेभ्यः वर्धित्वा ६१ रूप्यकाणि प्रतिलीटर।
- प्रोत्साहनराशिः- दुग्धविक्रयणाय केन्द्रं प्रति दुग्धं नयने कृषकेभ्यः प्रतिलीटर ३ रूप्यकाणि अतिरिक्तं प्रोत्साहनं दीयते।

**मुख्यमन्त्रिणः विचारः-**

मुख्यमंत्री उक्तवान् यत् राज्यसर्वकारस्य मुख्यं लक्ष्यं "ग्रामीण अर्थव्यवस्थायाः सुदृढ़ीकरणम्" अस्ति। व्यवस्थापरिवर्तनस्य माध्यमेन धनं साक्षात् कृषकाणां हस्ते प्रेष्यते। 'हिम' (HIM) इति नाम्ना राज्यस्य दुग्धोत्पादाः विपण्यां प्रवर्तयिष्यन्ते, येन अमूल-वेरका सदृशानां संस्थानां स्पर्धां कर्तुं शक्यते।
"वयं केवलं दुग्धमूल्यं न वर्धयामः, अपि तु ग्रामेषु यूनां कृते स्वरोजगारस्य अवसरान् अपि सृजामः।"

-सुखविंद्र सिंह सुक्खु

### कृषिमन्त्रिणः वक्तव्यम्-

कृषिमन्त्री प्रो. चन्द्रकुमारः अवदत् यत् अक्तूबरमासपर्यन्तं ढगवार-संयन्त्रम् आरप्स्यते। सः पशुनां नस्लसुधारे अपि बलं दत्तवान् तथा च उक्तवान् यत् मद्यविक्रयणे यत् 'सेस' (Cess) गृह्यते, तस्य उपयोगः दुग्धक्षेत्रस्य विकासाय क्रियते।

# हिमाचलप्रदेशे २०२५ वर्षे साइबर-वञ्चनस्य १८,७०० अभियोगाः, १३२ कोटिरुप्यकाणां वञ्चना



हिमसंस्कृतवार्ताः- धर्मशाला। हिमाचलप्रदेशे साइबर-अपराधानां प्रकरणाणि निरन्तरं वर्धन्ते। २०२५ वर्षे राज्ये छलसम्बद्धाः १८ सहस्र ७०० अभियोगाः (Complaints) पञ्जीकृताः, येषु प्रायः १३२ कोटिरुप्यकाणां वञ्चना अभवत्। वर्धमानानि प्रकरणाणि दृष्ट्वा 'भारतीय प्रतिभूति एवं विनिमय बोर्ड' (SEBI), 'नेशनल स्टॉक एक्सचेंज' (NSE) तथा आरक्षकविभागेन (Police Department) जागरुकता-अभियानं प्रारब्धम्। अस्मिन् क्रमे एनएसई-सेबी इत्यनयोः पक्षतः 'वित्तीय-साक्षरता' इत्यस्मिन् विषये एकः जागरुकता-कार्यक्रमः काङ्गड़ा-मण्डलस्य पुलिस- अधीक्षक-कार्यालये आयोजितः। कार्यक्रमे पुलिसविभागतः अतिरिक्त-पुलिस-अधीक्षकः बीरबहादुरसिंहः उपस्थितः आसीत्। तत्रैव सेबी-संस्थायाः उत्तरक्षेत्रस्य क्षेत्रीयनिदेशकः विजयन्तककुमारवर्मा, एनएसई-संस्थायाः च मुख्यप्रबन्धकः विवेक दुआ अपि सम्मिलितौ अभवताम्।
अतिरिक्त- आरक्षक- अधीक्षकः बीरबहादुरसिंहः अवदत् यत् वर्तमानसमये साइबर-अपराधानां ऑनलाइन- वञ्चनायाः च प्रकरणाणि निरन्तरं वर्धन्ते। अपराधिनः नूतनान् मार्गान् अनुसृत्य जनान् स्वजाले पातयन्ति। सः उक्तवान् यत् व्यापारिणः, सेवानिवृत्ताः अधिकारिणः सामान्याः जनाः अपि एतेषां वञ्चना-प्रकरणानां पीड़िताः भवन्ति। सः अकथयत् यत् अद्यतनसमये स्टॉक- मार्केट (Stock Market), निवेशः, धनद्विगुणीकरणम् इत्यादिनां प्रलोभनं दत्त्वा कोटिशः रुप्यकाणां वञ्चना क्रियते। ईदृशे समये आरक्षक-अधिकारिणां कर्मचारिणां च एतेषां मार्गाणां पूर्णज्ञानम् आवश्यकं वर्तते, येन सामान्यानां जनानाम् आर्थिकसुरक्षा सुनिश्चिता भवेत्। सेबी- संस्थायाः क्षेत्रीयनिदेशकः विजयन्तककुमारवर्मा अवदत् यत् जनानां आर्थिकसुरक्षायै एव सेबी-संस्थायाः सङ्घटनम् कृतम् अस्ति। सः उक्तवान् यत् सेबी-आरक्षकविमागौ मिलित्वा छल-प्रकरणानि रोद्धुं कार्यं कुर्वन्तः सन्ति। सः अकथयत् यत् साइबर- अपराधिनः निवेश-ट्रेडिंग-नाम्ना धनद्विगुणीकरणस्य लोभं दत्त्वा जनैः सह महतीं वञ्चनां कुर्वन्ति। अस्मिन् विषये जनानां प्रबोधनं अतीव आवश्यकं वर्तते, येन ते ईदृशात् छलात् रक्षितुं शक्नुयुः।

# प्रदेशे ३०० कोटिरुप्यकैः निर्मास्यन्ते नवीनानि दुग्ध-प्रसंस्करण-केन्द्राणि- मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारस्य तथा राष्ट्रिय- डेयरी- विकास- मण्डलस्य (NDDB) मध्ये सोमवासरे शिमलायां मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य उपस्थितौ त्रीणि सामञ्जस्य-पत्राणि (MoUs) हस्ताक्षरितानि अभवन्। एतेषु सामञ्जस्यपत्रेषु प्रदेशसर्वकारस्य पक्षतः पशुपालनसचिवः रितेशचौहानः, हिमाचलप्रदेश- राज्य-सहकारी- दुग्ध- उत्पादक- प्रसङ्घसमित्याः प्रबन्धनिदेशकः अभिषेकवर्मा च हस्ताक्षरं कृतवन्तौ। राष्ट्रिय- डेयरी- विकास- मण्डलस्य अध्यक्षेण डॉ. मीनेशशाहेन मण्डलस्य पक्षतः हस्ताक्षरं कृतम्। अस्मिन् अवसरे मुख्यमन्त्रीमहोदयः अवदत् यत् राज्यसर्वकारः प्रदेशस्य अन्यस्थानेष्वपि दुग्ध- प्रसंस्करण- केन्द्राणि स्थापयितुम् आगामिसमये ३०० कोटिरुप्यकाणि व्ययिष्यति।प्रथमं सामञ्जस्यपत्रं काङ्गड़ा- मिल्क- यूनियन इत्यस्य सङ्घटनार्थं सञ्चालनार्थं च अभवत्, द्वितीयं च नाहन-नालागढ़क्षेत्रयोः प्रतिदिनं २० सहस्र- सेटक- क्षमतायुतयोः द्वयोः दुग्ध- प्रसंस्करण- संयन्त्रयोः, हमीरपुरस्य जलाड़ी तथा ऊना- जनपदस्य झलेड़ा क्षेत्रयोः २० सहस्र- सेटक- क्षमतायुतयोः द्वयोः दुग्ध-अभिशीतन-केन्द्रयोः (Milk Chilling Centres) स्थापनाय कृतम्। तृतीयं सामञ्जस्यपत्रं 'मिल्कफेड' इत्यस्मिन् उद्यम- संसाधन- नियोजन- सॉफ्टवेयर, प्रयोगाय अभवत्। काङ्गड़ा- जनपदस्य ढगवारक्षेत्रे २५० कोटिरुप्यकाणां व्ययेन १.५० लक्ष- सेटक- प्रतिदिन- क्षमतायुतम् स्वचालित- आधुनिक- दुग्ध- प्रसंस्करण- संयन्त्रं स्थाप्यते, यस्य क्षमता भविष्ये प्रतिदिनं ३ लक्ष-लीटर-पर्यन्तं वर्धयितुं शक्यते।
अस्य अनुबन्धस्य अन्तर्गतं नवीन- मिल्क- यूनियन- मध्ये काङ्गड़ा- ऊना- हमीरपुर- चम्बा- जनपदाः सम्मिलिताः कृताः, येन दुग्ध- संग्रहण- प्रसंस्करण- विपणनव्यवस्थाः सुदृढाः भविष्यन्ति। दुग्ध- संग्रहण- गुणवत्ता- परीक्षण- उत्पादन- भण्डारण- वितरण- सम्बद्धानां सर्वासां प्रक्रियाणां डिजिटल-प्रबन्धनं सम्भविष्यति। दुग्ध- उत्पादक- कृषकाणां विवरणं व्यवस्थितं भविष्यति, तेभ्यः समये पारदर्शिरीत्या च धनप्रदानं कर्तुं शक्यते। उत्पादनप्रबन्धनं, भण्डारनियन्त्रणम्, आपूर्तिशृङ्खलायाः निरीक्षणम् अधिकं प्रभावकारी भविष्यति। मुख्यमंत्री अवदत् यत् ढगवार-संयन्त्रस्य निर्माणानन्तरं 'हिम' (HIM) इति नाम्ना गुणवत्तापूर्णाः उत्पादाः विपण्यां आगमिष्यन्ति। मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशः दुग्धक्रयणे सर्वाधिकं समर्थनमूल्यं प्रदाता देशस्य प्रथमं राज्यम् अभवत्।

### वेरका-अमूल-संस्थावत् उत्पादाः अग्रे नेयाः भविष्यन्ति- चन्द्रकुमारः

कृषि मन्त्री प्रो. चन्द्रकुमारः 'हिम' इति ब्राण्ड-उत्पादानां प्रचाराय बलं दत्त्वा अवदत् यत् अस्माभिः स्वोत्पादाः वेरका-अमूल-संस्थावत् अग्रे नेयाः भविष्यन्ति। अस्मिन् वर्षे अक्तूबरमासपर्यन्तं ढगवार-दुग्ध-संयन्त्रं प्रारब्धं भविष्यति। अनेन काङ्गड़ा, ऊना, हमीरपुरं, चम्बा जनपदानां कृषकाणां लाभः भविष्यति। सः अवदत् यत् कृषकाणां पशुनां स्वास्थ्य-परिष्कारस्यापि आवश्यकता अस्ति, राज्यसर्वकारः च तान् उत्तम- नस्ल- पशून् क्रेतुं प्रोत्सहिष्यति।

# अटल-कन्दरासहितायां लाहौल-उपत्यकायां हिमपाते शताधिकाः पर्यटकाः अवरुद्धाः, प्रशासनस्य परामर्शः



**हिमसंस्कृतवार्ताः - मनाली।** हिमाचलप्रदेशे ऋतुपरिवर्तनेन पर्यटकानां कष्टानि वर्धितानि। अटल-कदरा-रोहताङ्ग-सहितायां लाहौल-स्पीति-उपत्यकायां पर्यटकाः अवरुद्धाः सन्ति। अटल-कन्दरायाः अन्तः एव शताधिकानि वाहनानि स्थगितानि। तत्रैव लाहौल-क्षेत्रस्य विभिन्नेषु पर्यटनस्थलेषु पर्यटकाः विभिन्नेषु स्थानेषु आश्रयं स्वीकृतवन्तः। लाहौल-क्षेत्रे पर्याप्तानां विश्रामालयानां (Hotels) अभावात् पर्यटकाः गेस्ट-हाउस, होम-स्टे, भोजनालय (Dhaba) इत्यादिषु स्थानेषु स्थिताः सन्ति। सर्वे पर्यटकाः मार्गप्रक्षालनस्य (बर्फ हटने का) प्रतीक्षाम् कुर्वन्तः सन्ति।

लाहौल-स्पीति जनपदस्य समस्त-उपत्यकायां हिमपातः प्रचलति, येन जनजीवनं प्रभावितम् अभवत्। शिंकुला-दर्रा इत्यत्र विगत-अष्टदिनेभ्यः वाहनानां गमनागमनं स्थगितम् अस्ति। अतिहिमपातेन बीआरओ (BRO) संस्थायाः मार्ग-पुनरुद्धार-कार्यमपि प्रभावितम् अभवत्।

### लाहौल-क्षेत्रे जनजीवनं प्रभावितम्

मनाली-केलाङ्ग-मार्गः अपि अवरुद्धः जातः। कोकसर-क्षेत्रे प्रायः एकपादमितः, सिस्सु-क्षेत्रे पादोनपादमितः, गोन्दला-मुलिंग-क्षेत्रयोः अर्ध-पादमितः तथा जिला-मुख्यालये केलाङ्ग-नगरे त्रि-इञ्च्-मितः हिमपातः अभवत्।

### रोहताङ्ग-दर्रा इत्यत्र सार्धैकपादमितं हिमपातः

कुल्लू-लाहौल जनपदयोः योजक-रोहताङ्ग-दर्रा इत्यत्र सार्धैकपादमितः हिमपातः अङ्कितः। रोहताङ्ग-सहिते शिंकुला-बारालाचा-कुञ्जम-दर्रा इत्येतेषु हिमस्य महान्तः राशयः सञ्चिताः। पर्यटननगर्यां मनाल्याम् अपि हिमबिन्दवः (Snowflakes) पतिताः। रोहताङ्गे रविवासरात् आरब्धः हिमपातः सोमवासरेऽपि प्रचलति। मढ़ी-क्षेत्रे एकपादमितः, गुलाबा-क्षेत्रे सप्त-इञ्च् तथा सोलङ्गनाला-कोठी-क्षेत्रयोः चत्वारि-इञ्च्-मितः अभिनव-हिमपातः जातः।

## मनाली-नगरेऽपि हिमपातः

अपराह्णानन्तरं मनाली-नगरेऽपि त्रि-इञ्च्-अधिकं हिमं पतितम्। पर्यटकाः माल-रोड-मनालीतः सोलङ्गनाला-पर्यन्तं हिमपातेन आनन्दिताः अभवन्। ऋतुपरिवर्तनेन पर्यटन-व्यापारिणां, कृषकाणां, फल-उत्पादकानां च मुखेषु हास्यं जातम् , परन्तु शैत्यं चरमसीमां प्राप्तवत्।

### प्रशासनस्य परामर्शः

प्रशासनेन पर्यटकानां कृते परामर्शः निर्गतः यत् ते 'यत्र सन्ति, तत्रैव तिष्ठन्तु'। हिमे वाहनचालनस्य संकटं न स्वीकुर्वन्तु। आरक्षकविभागे (Police) तथा उद्धारकदले (Rescue Team) आगते सति एव वाहनं निष्कासयितुं प्रयत्नं कुर्वन्तु।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। एकेन जागरूक-पुरुषेण विद्यालय-यानात् करगदखण्डानि क्षिपन्तः छात्राः मार्गे भर्त्सिताः।

**नन्दिनी-** आम्, मार्गाणां स्वच्छतायै तेन सम्यक् एव आचरितम्। अपरस्यां वार्तायां, बेङ्गलूरु-नगरे एकेन पुरुषेण स्वस्य आय-व्यय-विवरणं प्रकाशितम्। तेन सार्ध-लक्ष-रूप्यकाणां वेतने प्राप्ते अपि केवलं विंशति-सहस्र-रूप्यकाणां सञ्चयः कृतः।

**काव्या-** अहो! नगर-जीवनेन जनाः अतीव पीडिताः। इदानीं विमानस्थानकस्य वार्तां शृणु। सुरक्षा-परीक्षण-समये राजस्थान-राज्यस्य लोककलाकारैः मधुरं गीतं गीतम्।

**नन्दिनी-** कलाकाराणां सङ्गीतेन नीरसं कार्यम् अपि आनन्दमयं कृतम्। अन्तिमा वार्ता अतीव विचित्रा। थाई-देशे एकया महिलया स्वस्य वञ्चकः पतिः अन्यस्यै स्त्रियै भाटकेन दत्तः। सा पत्नी प्रतिमासं पञ्चाशीति-सहस्र-रूप्यकाणि याचितवती अस्ति।

**काव्या-** हा हा! एतत् श्रुत्वा अहम् अतीव हसितवती अस्मि। अद्यतनाः वार्ताः समाप्ताः। धन्यवादः।

# कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः (१४) दीक्षान्त-समारोहः मार्च १८ दिनांके

**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, रामटेकम्।**

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः (१४) दीक्षान्त-समारोहः बुधवासरे, १८ मार्च २०२६ दिनाङ्के प्रातः ११:०० वादने विश्वविद्यालयस्य परिसरे आयोजितः भविष्यति। अस्य समारोहस्य अध्यक्षता विश्वविद्यालयस्य माननीय-कुलगुरुः डॉ. अतुल-वैद्य-महोदयः करिष्यति। मुख्य-अतिथि-रूपेण भारतस्य प्रख्यातः अभियान्त्रिक-वैज्ञानिकः, पद्मश्री प्रो. गणपति-यादव-महोदयः (पूर्वतन्-कुलगुरुः, आईसीटी मुम्बई) उपस्थितः भविष्यति। अस्मिन् अवसरे कुलसचिवः डॉ. रोशन-अलोने, परीक्षा-नियन्त्रकः डॉ. केशव-मोहरीरः तथा च विद्वत्-परिषदः सदस्याः उपस्थिताः भविष्यन्ति।

## उपाधि-प्रदानस्य विवरणम्

अस्मिन् समारोहे २०२४-२५ वर्षे उत्तीर्णेभ्यः छात्रेभ्यः आहत्य १४५६४ उपाधि-प्रमाणपत्राणि वितरिष्यन्ते। येषु मुख्याः सन्तिः स्नातकोत्तर-उपाधयः (PG): २७२२ स्नातक-उपाधयः (UG): ९४९३ पदविका (Diploma): १८०९ स्नातकोत्तर-पदविका (PG Diploma): ९० प्रमाणपत्राणि: ८७ मुक्त-दूरस्थ-शिक्षा-केन्द्रद्वारा (CDOE): ३४८ (उपाधयः, पदविकाः च) अत्र ५४ स्वर्णपदकानि तथा १३ नकद-पुरस्काराः अपि प्रदास्यन्ते। अपि च १४ शोधच्छात्रेभ्यः 'विद्यावारिधि' (Ph.D.) उपाधिः प्रदास्यते।

## समारोहस्य प्रमुखाणि वैशिष्ट्याणि

१. मानद-विद्यावाचस्पति-उपाधिः (D.Litt.): बहुभाषाविदा, कवयित्री श्रीमती आशा भालचन्द्र पाण्डे महोदया मराठी-संस्कृत-हिन्दी-उर्दू-भाषासु साहित्य-योगदानाय 'डी.लिट्' इति मानद-उपाधिना अलङ्करिष्यते।

२. सर्वाधिक-पदक-विजेता: एम.ए. आचार्य (संस्कृत) विषये सर्वाधिक-अङ्क-प्राप्त्यै धनश्री सुभाष लोणकर महोदयायै ११ स्वर्णपदकानि तथा १ नकद-पुरस्कारः प्रदास्यते। सा 'कुलपति-स्वर्णपदकेन' अपि सम्मानिता भविष्यति।

३. सर्वोत्तम-अष्टपैलू-विद्यार्थी (All-rounder):- रामटेक-वारङ्गा-रत्नागिरी-परिसराणां छात्रेषु सर्वश्रेष्ठ-बहुआयामी-प्रदर्शनाय अनुज रवी मञ्चावार महोदयाय 'श्री समर्थ सद्गुरु शङ्कर महाराज रसाळ स्मृति स्वर्णपदकं' प्रदास्यते।

### सर्वोत्तम-प्रबन्ध-पुरस्काराः (Best Thesis Awards)

विभिन्न-सङ्कायेषु (Faculties) सर्वश्रेष्ठ-शोध-प्रबन्धाय स्वर्णपदकानि एतेभ्यः प्रदास्यन्ते:

उन्मेष रत्नाकर बोहटे: - वेदविद्या-सङ्कायः।

भारत पाण्डुरङ्ग मिसाळः - संस्कृत-संस्कृतेतर-भाषा-सङ्कायः।

सानिका अवधूत बामः - भारतीय-धर्म-दर्शन-संस्कृति-सङ्कायः।

अतुल भुजङ्गराव ठाकरेः - नशिक्षाशास्त्र-सङ्कायः।

देवलपल्ली अन्वेषः - प्राचीन-भारतीय-विज्ञान-मानविकी-सङ्कायः।

### प्रमुख-परीक्षासु प्रथम-स्थान-प्राप्त-छात्राः

| छात्रस्य नाम | पाठ्यक्रमः |
|---|---|
| युवराज दीपककुमार भोगांवकर | एम.ए. (व्याकरणम्) |
| यश ब्रिजेश पाण्डे | एम.ए. (दर्शनम्, संस्कृतम् च) |
| नैना शेणॉय | एम.ए. (योगशास्त्रम्) |
| शीतल विजय- मदनकर | एम.ए. (ज्योतिर्विज्ञानम्) |
| ज्ञानेश्वरी सबाजी ससे | बी.ए. (विशारदः) |
| किरण बळवन्त लाड | बी.ए. (योगशास्त्रम्) |
| मञ्जुषा बापू यादव | बी.ए. (कीर्तनशास्त्रम्) |
| हिमांशु सतीश शर्मा | प्राक्शास्त्री (प्रथमः) |
| वेदांशी वैभव पटेल | शास्त्री (प्रथमा) |
| माधुरी सुधाकर हारोडे | बी.एड. (शिक्षाशास्त्री - प्रथमा) |






विश्वविद्यालयस्य एषः दीक्षान्त-समारोहः संस्कृतस्य आधुनिक-विषयाणां च अद्भुत-सङ्गमः भविष्यति।

अस्मिन् सन्दर्भे आयोजितां पत्रकार-परिषदं विश्वविद्यालयस्य कुलगुरुः डॉ. अतुल-वैद्य-महोदयः सम्बोधितवान्।

अस्मिन् अवसरे कुलसचिवः डॉ. रोशन-अलोने, अधिष्ठाता प्रो. कविता-होले, प्रो. कृष्णकुमार-पाण्डेयः, परीक्षा-नियन्त्रकः डॉ. केशव-मोहरीरः, सहायक-कुलसचिवः श्री सुमित-कठाळे तथा च जनसम्पर्क-अधिकारी डॉ. रेणुका-बोकारे उपस्थिताः आसन्।

# काञ्चीपुरम् (तमिलनाडु) इत्यस्य पावनधरायां मध्यप्रदेशस्य गौरवम्
# भुवनमोहनवशिष्ठः राष्ट्रियस्तरे सम्मानितः



समापनसमारोहः - 63तम्याः अखिलभारतीयशास्त्रीयस्पर्धायाः, केन्द्रीयसंस्कृतविश्वविद्यालयः

**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्ल, भोपालम्,** सप्तपुरीषु प्रधानायां ज्ञानस्याधिष्ठात्र्यां च नगर्यां काञ्चीपुरम् (तमिलनाडु) इत्यत्र केन्द्रीय- संस्कृत- विश्वविद्यालयेन (नवदेहली) आयोजितस्य ६३ तमस्य अखिलभारतीय- शास्त्रीयस्पर्धोत्सवस्य अवसरे मध्यप्रदेशस्य मेधाविना छात्रेण स्वप्रतिभायाः ध्वजः उत्तोलितः। अस्मिन् भव्यसमायोजने काञ्चीकामकोटिपीठस्य पूज्यपादानां जगद्गुरुशङ्कराचार्याणां सान्निध्ये देशस्य मूर्धन्यविदुषां जिज्ञासूनां च अपूर्वः सङ्गमः दृष्टः।

अस्मिन् राष्ट्रियस्तरीये महोत्सवे भारतस्य प्रायः २३ प्रान्तेभ्यः आगताः लब्धप्रतिष्ठिताः विद्वांसः प्रकाण्डाः छात्रछात्राश्च सम्मिलिताः अभवन्। आयोजनस्य अन्तर्गते शास्त्रार्थ- शलाकापरीक्षा- कण्ठपाठ- भाषणप्रतियोगितासदृशाः कठिनाः बौद्धिकस्पर्धाः आयोजिताः, यासु प्राचीनज्ञानविज्ञानस्य गूढरहस्यानां मन्थनम् अभवत्।'भारतीयज्ञानपरम्परा' इति गौरवपूर्णप्रतियोगितायां केन्द्रीय- संस्कृत- विश्वविद्यालयस्य भोपालपरिसरस्य (मध्यप्रदेशः) प्रतिनिधित्वं कुर्वन् भुवनमोहनवशिष्ठः (आचार्यवेणीप्रसादवशिष्ठस्य सुपुत्रः) स्वकीयां वाग्मितां शास्त्रबोधं च प्रदर्शितवान्। सः 'भारतीयज्ञानपरम्परा' इति विषये भाषणस्पर्धायां सम्पूर्णदेशे तृतीयस्थानं सम्प्राप्य न केवलं स्वविश्वविद्यालयस्य कुलपरिवारस्य च मानं वर्धितवान्, अपि तु सम्पूर्णमध्यप्रदेशस्य ज्ञानपरम्परामपि गौरवान्वितां कृतवान्।

काञ्च्याः अस्यां पुण्यभूमौ शङ्कराचार्याणां सान्निध्ये प्राप्ता इयमुपलब्धिः संस्कृतजगते शैक्षणिकक्षेत्रे च अतीव सम्मानदृष्ट्या दृश्यते। तस्य अस्यां सफलतायां विश्वविद्यालयस्य आचार्यवृन्दैः मित्रैश्च हर्षः प्रकटितः, तस्य यशस्वीभविष्याय मङ्गलकामनाश्च कृताः।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -१०

सरला कथेयम्। अभ्यासाय स्त्रीलिङ्गयुक्तः शत्रन्तप्रयोगोऽत्र दीयमानः वर्तते। कथा एतादृशी रम्या, सरला, बोध्या च वर्तते। रमा काचित् सुशीला बालिका। सा सदैव अध्ययने रता। सा सप्तमकक्ष्यायां पठन्ती, मातुलगृहे निवसन्ती च तत्र मातुलान्या सह पाककार्ये साहाय्यं कुर्वती च सुखेन तिष्ठति स्म। सा सायङ्कालिकस्य भ्रमणार्थं गच्छन्ती मातुलान्या सह प्रतिदिनं हसन्ती, वार्तालापं च कुर्वती रमते स्म। मातुलगृहतः किञ्चिद्दूरे समुद्रः विराजते। एकदा सा मातुलान्या सह तत्र सम्प्राप्य समुद्रं पश्यन्ती एकत्र बालुकायाम् उपाविशत्। मातुलानी अपि तया सहैव उपाविशत्। सम्यग्रूपेण समुद्रदिशि पश्यन्ती सा तरन्त्यः नौकाः, एवं प्रत्यागच्छन्त्यः नौकाः च दृष्ट्वा नितरां रममाणा जाता। तत्र भ्रमन्तीभिः युवतीभिः सह मध्ये मध्ये वार्तालापमपि कुर्वती अतिष्ठत्। किञ्चिदनन्तरं सा उत्थाय एकं शङ्खकीटम् अवलोक्य तद्ग्रहीतुं धावन्ती, समुद्रजलं स्पृशन्ती च अग्रेसरा अभवत्। निवारयन्त्याः मातुलान्याः वचनं यदा सा न अशृण्वत् तदा मातुलानी कुप्यन्ती गृहं प्रत्यावर्तितुम् ऐच्छत्। गृह-प्रत्यावर्तनम् इच्छन्तीं तां दृष्ट्वा सा तादृशम् आचरणं त्यक्तवती। तत्र किञ्चित् स्थातुम् अनुज्ञां याचन्त्याः तस्याः अनुरोधं स्वीकृत्य मातुलानी पुनः तत्र स्थितवती। समुद्रस्य रमणीयां शोभां द्रष्टुं तत्र बह्व्यः पुरुषमहिलाः समागताः आसन्। तत्र उपविशन्तीभिः अटन्तीभिः च युवतीभिः, महिलाभिः च सह ते द्वेऽपि वार्तालापं कुर्वत्यौ आस्ताम्, ततः आगच्छन्तीं तमिस्रां च दृष्ट्वा ते द्वे शीघ्रं शीघ्रं पादचालयन्त्यौ स्वगृहं प्रत्यागतवत्यौ।




# कथा-मूर्खाय उपदेशः हानिकरः

एकस्मिन् वने एकस्मिन् वृक्षे एका चटका स्व नीडे निवसति स्म। एकदा अतीव शैत्यम् आसीत्। शीतार्ताः त्रयः वानराः तस्य वृक्षस्य अधः आश्रयं गृहीतवन्तः। तदा एकः वानरः अवदत्- "यदि कुतश्चित् अग्निः प्राप्येत, तर्हि शीतनिवारणं भवितुं शक्नोति।"

इति श्रुत्वा द्वितीयः वानरः अवदत्- "पश्यन्तु, अत्र तु बहूनि शुष्कपर्णानि पतितानि सन्ति। एतानि एकत्रीकृत्य तस्य प्रज्वालनस्य उपायं चिन्तयामः।" वानराः शुष्कपर्णानां राशिं कृतवन्तः, ततः मण्डलाकारे उपविश्य तं पर्णराशिं कथं प्रज्वालयेयुः इति चिन्तयितुम् आरब्धवन्तः। तदैव एकस्य वानरस्य दृष्टिः दूरे आकाशे उड्डीयमाने एकस्मिन् खद्योते (जुगनू) पतिता। सः तत्रैव इतस्ततः धावन् उच्चैः अवदत्- "पश्यन्तु, पश्यन्तु आकाशे स्फुलिङ्गः (चिंगारी) अस्ति!" "एतमेव गृहीत्वा राशेः अधः स्थाप्य फूत्कारं कुर्मः तेन प्रकारेण अग्निः प्रज्वलितां भविष्यति।" "आम्, आम्!" इति वदन्तः अन्ये वानराः अपि तत्र अधावन्। वृक्षे स्वनीडे स्थिता चटका एतत् सर्वं पश्यन्ती आसीत्। वानराणां मूर्खतां दृष्ट्वा सा मौनं स्थातुं न अशक्नोत्। सा अवदत्- "वानर- भ्रातर! एषः स्फुलिङ्गः नास्ति, एषः तु खद्योतः (जुगनू) अस्ति।"एकः वानरः क्रोधेन चटकां दृष्ट्वा अवदत्- "मूर्खे चटके! तूष्णीम् भूत्वा स्वनीडे तिष्ठ। अस्मान् मा शिक्ष।“ एतस्मिन् अन्तरे अपरः वानरः उत्प्लुत्य खद्योतं स्वहस्तयोः मध्ये गृहीतवान्। तं खद्योतं पर्णानां राशेः अधः स्थाप्य सर्वे वानराः परितः स्थित्वा फूत्कारं कर्तुम् आरब्धवन्तः। चटका पुनः अवदत्- "भ्रातरः! भवन्तः किम् कुर्वन्ति? खद्योतेन अग्निः कदापि न ज्वलिष्यति। द्वौ प्रस्तरौ (दो पत्थर) घर्षयित्वा अग्निं उत्पादयन्तु।"

वानराः चटकां क्रोधेन पश्यन् तां दुर्वचनानि वदन्ति परन्तु केनापि प्रकारेण अग्निः न प्रज्ज्वलति। तदा चटका पुनः अवदत्- "भ्रातरः! मम वचनं शृण्वन्तु, न्यूनतं द्वे शुष्ककाष्ठे (सूखी लकड़ियाँ) परस्परं घर्षयन्तु।" सर्वे वानराः पुनः पुनः प्रयत्नं कुर्वन्ति परन्तु अग्निप्रज्ज्वालने असमर्थाः एव गच्छन्ति। अतः ते अतीव क्रुद्धाः अभवन्। एकः वानरः कोपेन अग्रे आगत्य चटकां गृहीत्वा वेगेन वृक्षस्य स्कन्धे ताडितवान्। चटका तत्रैव पतिता मृता च।

**शिक्षा-** "मूर्खेभ्यः उपदेशो न दातव्यः।"



हिमसंस्कृतवार्ताः
दिलीपः,संस्कृतशिक्षकः
शिक्षाविभागः हि.प्र.

# "वन्दे संस्कृतमातरम्"
# "लौकिकन्यायकोशः"
## *"अब्भक्षन्यायः"*

जलस्य अपानम् इति क्रिया द्विविधा भवति-
(अ) भोजनात् अनन्तरं जलस्य अपानम्।
(आ) जलस्यापि पानस्य अभावः अनेन न्यायेन इतरभक्षणमपि निषिद्धं भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# हास्यकणिका




### 1. साक्षात्कार (Interview)

**संता-:** (साक्षात्कारे) अहमस्य पदस्य कृते सर्वथा योग्यः।
**अधिकारी-:** कथमिति?
**संता-:** यतः मम विवाहे अपि अहमेव 'वरः' (सर्वश्रेष्ठः) चितः आसम्!

### 2. चिकित्सालयः (Hospital)

**बंता-:** मित्र संता, त्वं किमर्थं चिकित्सालये धावन् असि?
**संता-:** पश्य, परिचारिका (Nurse) वदति स्म - "साहसं कुरु, लघु शल्यक्रिया अस्ति, चिन्तां मा कुरु।"
**बंता-:** एतत्तु उत्तमम्, सा त्वां धैर्यं ददाति स्म।
**संता-:** नहि मित्र! सा एतत् मह्यं न, अपितु वैद्याय (Doctor) वदति स्म!

### 3. रेलस्थानकम् (Railway Station)

**बंता-:** संता, त्वं रेलयानस्य (Train) उपरि किमर्थं शयनं करोषि?
**संता-:** यतः मया 'अपर-बर्थ' (Upper Berth) आरक्षितं कृतम् अस्ति!